11-12-2020

साहित्यम् ।    शास्त्री

## छन्दालङ्कारौ विवेच्यताम् ।

निजदोषावृतमनसामति सुन्दरमेव भाति विपरीतम् ।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् ॥

एतत् पद्यं वर्णविषमवृत्तम् अस्ति । यगणादिक्रमः अनिश्चितः अस्ति । अतएव इदं पद्यं मात्रिक छन्दः अस्ति ।

मात्रानिर्णयः → प्रथमे पादे → 12 मात्राः, द्वितीये - 18, तृतीये - 12
चतुर्थपादे - 15 मात्राः

1 1 2 2 1 1 1 1 2   1 1 2 1 1 2 1 2 1 1 1 2 2
निजदोषावृतमनसाम्, अति सुन्दरमेव भाति विपरीतम् ।

2 1 1 2 2 1 1 2   1 1 2 2 2 1 1 2 2
पश्यति पित्तोपहतः, शशिशुभ्रं शङ्खमपि पीतम् ॥

मात्रागणनानुसारेण अत्र अस्मिन् पद्ये **आर्या छन्दः** ।

लक्षणमस्ति →

"यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या ॥"

अलङ्कारः → **अर्थान्तरन्यासः** ।

लक्षणम् → "सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।
यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥"

अत्र साधर्म्येण सामान्यं विशेषेण समर्थ्यते ।

11-12-2020

डॉ० निर्मलकुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

अनिवार्यपत्रम् । उपशास्त्री II 11-11-2020

संस्कृतेऽनुवादं कुरु →

1. मैं पुस्तक पढ़ता हूँ - (कर्तृवाच्ये) → अहं पुस्तकं पठामि ।
2. मेरे द्वारा पुस्तक पढ़ी जाती है - (कर्मवाच्ये) → मया पुस्तकं पठ्यते ।
3. वह चन्द्रमा को देखता है - सः चन्द्रं पश्यति ।
4. उसके द्वारा चन्द्रमा देखा जाता है - तेन चन्द्रः दृश्यते ।
5. मैं घर जाता हूँ - अहं गृहं गच्छामि ।
6. मुझसे घर को जाया जाता है - मया गृहं गम्यते ।
7. हमलोग मिठाई खाते हैं - वयं मिष्टान्नं खादामः ।
8. हमलोगों से मिठाई खाई जाती है - अस्माभिः मिष्टान्नं खाद्यते ।
9. लड़के फल खाते हैं - बालकाः फलानि खादन्ति ।
10. लड़कों से (के द्वारा) फल खाया जाता है - बालकैः फलानि खाद्यन्ते ।

कर्तृवाच्यस्य वाक्ये कर्तरि प्रथमाविभक्तिः भवति । अनुक्ते कर्मणि द्वितीया विभक्तिः भवति, क्रिया कर्तृपदानुसारेण भवति । यथा → रामः पुस्तकं पठति । अस्मिन् वाक्ये रामः कर्तृपदं तेन सह प्रथमाविभक्तिः एकवचने । क्रिया 'पठति' अपि कर्तृपदानुसारेण प्रथमपुरुषे, एकवचने अस्ति । किन्तु कर्मवाच्ये अनुक्ते कर्तरि तृतीया विभक्तिः भवति । उक्ते कर्मणि प्रथमा विभक्तिः । धातुना सह 'यक्' (य) प्रत्यये कृते आत्मनेपदयां कर्मानुसारेण क्रियापदं भवति । यथा -

कर्तृवाच्ये - बालिकाः विद्यालयं गच्छन्ति ।
कर्मवाच्ये → बालिकाभिः विद्यालयः गम्यते ।

कर्तृवाच्ये → वयं पत्राणि लिखामः ।
कर्मवाच्ये → अस्माभिः पत्राणि लिख्यन्ते ।

11-11-2020

डॉ० निर्मलकुमार झा, स० प्राचार्य
राधाउमाकान्त सं० महावि० सुखसेना पूर्णि

11-12-2020

संस्कृतसामान्यम्। उपशास्त्री-I
अनिवार्यपत्रम्। हितोपदेशः। श्लोकव्याख्या।

" यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवः।
न च विद्याऽऽगमः कश्चित्तं देशं परिवर्जयेत्॥ "

सन्दर्भः→ प्रस्तुतोऽयं श्लोकः महाकविश्रीनारायणपण्डितरचितस्य 'हितोपदेश' ग्रन्थात् 'मित्रलाभात्' भागात् गृहीतोऽस्ति।

अन्वयः→ यस्मिन् देशे सम्मानो न, वृत्तिः न, बान्धवः न, न च कश्चित् विद्यागमः (अस्ति), तं देशं परिवर्जयेत्।

शब्दार्थः व्याकरणञ्च → यस्मिन् = यत् शब्दस्य सप्तमी विभक्तौ एकवचने पुल्लिङ्गे नपुंसके वा रूपम् = यत्र स्थाने। देशे = राष्ट्रे। न = निषेधार्थकाव्ययः, नहि। सम्मानः → सम् + मानः, (सत्कारः)। वृत्तिः → √वृत् + क्तिन् = व्यवसायः, आजीविका। विद्याऽऽगमः → विद्या + आगमः = विद्यालाभः। कश्चित् → कः + चित् = कोऽपि निश्चयेन। तम् → तत् पुल्लिङ्गे द्वितीयैकवचने रूपम् = तंस्थानम्। परिवर्जयेत् → परि उपसर्गपूर्वकात् वृज् धातोः विधिलिङ्गे रूपम् = त्यजेत्, त्यक्तुं शक्यते।

बान्धवः → बन्धु + अण्।

आशयः→ कविरत्र निवासयोग्यं स्थानं देशं वा वर्णयति। सः कथयति यत् यत्र स्थाने देशे वा जीविकोपार्जनस्य साधनं न वर्तते, जनाः प्रवासीपुरुषस्य सम्मानं, आतिथ्यं सत्कारः वा न कुर्वन्ति, विद्यालाभस्य साधनं नैवास्ति तथा च तस्मिन् देशे स्वजनस्य अभावमस्ति, एतादृशं स्थानं देशं वा त्यजेत्। एतादृशे स्थाने जीवनयापनं कठिनं भवति।

[signature] 11-12-2020

डॉ० निर्मलकुमार झा, (स० प्राचार्य)।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।